# संस्कृतम् (ऐच्छिकम्)

## विषय-कोड्-सङ्ख्या - 022

## कक्षा – एकादशी-द्वादशी (2025-26)

## पाठ्यक्रमः परीक्षानिर्देशाश्च

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा, मानवः स्वमनसि विद्यमानान् विचारान् भावनाः अनुभूतिं च अर्थयुक्तैः ध्वनिभिः लिखितसङ्केतैः च व्यक्तीकरोति सा भाषा। भाषा अभिप्रायप्रकटनस्य साधनम्। वस्तुतः लोके द्वयोः मनुष्ययोः मध्ये परस्परम् अवबोधनाय, भावग्रहणाय, भावविनिमयाय च भाषया विना न अन्यत् स्पष्टतमं सरलतमं च साधनं विद्यते। लोके बहव्यः भाषाः सन्ति यासु संस्कृतभाषा अतिप्राचीनतमा समृद्धा च अस्ति। संस्कृतभाषायाम् एव सन्ति ऋग्यजुस्सामाथर्वाः चत्वारः वेदाः, शिक्षा, व्याकरणं, निरुक्तं, ज्योतिषं, छन्दः कल्पः चेति षडङ्गानि, चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः, योगशास्त्रादयः ग्रन्थाः। अतः संस्कृतं केवलं भाषा न अपितु किञ्चन जीवनदर्शनम् इति। इयं विद्या (भाषा) भारतीयानां प्रतिष्ठात्मिका कामधेनुः समस्तज्ञानप्रदात्री, ऐक्यप्रदात्री, धर्मार्थकाममोक्षप्रदात्री च अस्ति। सृष्टेः आदितः अद्यावधिः यत् शिक्षणं ज्ञानविज्ञानं च अस्ति तत् सर्वम् अस्यां भाषायामेव सन्निहितम् अस्ति। अतिसूक्ष्मभावनां प्रकटयितुं स्पष्टीकर्तुं संस्कृतं विना नैव अन्यत्र विद्यते सामर्थ्यम्। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वं च अस्यां भाषायाम् अस्ति।

संस्कृतस्य भाषावैज्ञानिकत्त्वम् – ऐतिहासिक-वर्णनात्मक-तुलनात्मकाध्ययन-द्वारा भाषायाः प्रकृतेः विकासोत्पत्तेः संरचनायाः अध्ययनपूर्वकं सर्वेषां विषयाणां सैद्धान्तिकः निर्णयः भाषाविज्ञानेन क्रियते। भाषाविज्ञान-नामकशास्त्रे शब्दानाम् उत्पत्तिः, वाक्यानां संरचना इत्यादीनां विषयाणां विचारः क्रियते। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सह अस्ति। एवं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां प्रकृति-प्रत्ययादीनां, संज्ञासर्वनाम-क्रिया-विशेषणादीनां नामाख्यात-उपसर्जननिपातानां पदपदार्थविषयकाणां विकारादीनां विकारमूलककारकाणाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते। भाषाविज्ञाने संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीव वैज्ञानिकं निरूपणं कृतं वर्तते।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभ्यन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। सर्वासु भारतीयभाषासु संस्कृतभाषा अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम्, साहित्यं संस्कृतिवाहकञ्च इति।" एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च -

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः॥
संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते॥

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

**शिक्षणोद्देश्यानि –**

* वसुधैव-कुटुम्बकम् इति भावनाविकासः।

* भारतीयभाषाणां संरक्षणम्।
* संस्कृतभाषया सम्प्रेषणकौशलविकासः।
* परस्परं संस्कृतसम्भाषणेन भावविनिमयः।
* संस्कृत-भाषया एव संस्कृत-शिक्षणम्।
* श्रवण-भाषण-पठन-लेखनेति चतुर्णां भाषिक-कौशलानां विकासः।
* बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानम्।
* मानसिकविकासानन्दानुभूतिः रसानुभूतिश्च।
* भारतीयसंस्कृतेः संरक्षणं ज्ञानवर्धनञ्च।
* आत्मानुशासनसंस्थापनार्थम्
* भाषाशिक्षणकौशलानि वर्धनाय नैपुण्यप्राप्तिः।
* परस्परं वार्तालापमाध्यमेन भावविनिमयः।
* संस्कृतसाहित्यस्य अध्ययनेन ज्ञानानन्दस्य अनुभूतिः।
* मानवजीवनस्य विकासपूर्वकं कल्याणम्।
* संस्कृतभाषया छात्राणां सर्वविधविकासः।

**शिक्षणप्रविधयः -**

* संस्कृतमाध्यमेन सम्भाषणविधिना शनैः शनैः संस्कृतशिक्षणं सम्भविष्यति। गतिवर्धनाय संस्कृताध्यापकैः धैर्येण स्वकीयाध्यापन-कार्यक्रमाणां नियोजनम्। रुचिकरभाषाभ्यासेन भाषिकोपलब्धिः। भाषिकाभ्यासाय वार्तालाप-कथाश्रवण-वादविवाद-संवाद-वर्णनपरकप्रतियोगिताभिः भाषाशिक्षणं कारयितुं शक्यते।
* विभिन्नप्रामाणिकसंस्थानां कार्यक्रमाः साहित्यसामग्र्यश्च प्रयुज्य उत्तमशिक्षणं कर्तुं शक्यते।
* संस्कृतभाषया उपलब्ध-दृश्य-श्रव्य-सामग्री-माध्यमेन भाषाभ्यासः।
* विभिन्नपाठ्यसामग्रीद्वारा शिक्षकः स्वकीयं शिक्षणकार्यं रुचिकरं कर्तुं शक्नोति।
* भाषाशिक्षकः छात्रान् स्नेहपूर्वकम् (आत्मीयभावेन) पाठयेत्।
* अद्यतनपूर्वकं साहित्यकोश-शब्दकोश-सन्दर्भग्रन्थानां सहायतया छात्राणां तत्परतावर्धनम्।
* प्राचीनार्वाचीनयोर्मध्ये समन्वयस्थापनद्वारा नूतनशिक्षणविधिभिश्च संस्कृतशिक्षणम्।

**कौशलानि-**

* **श्रवणकौशलम्** – भावाधिग्रहणाय ध्वन्यात्मकं भाषायाः प्रथमं कौशलम् इदम्। अस्य साधनानि- गुरुमुखम्, आकाशवाणी, दूरवाणी, परिवारसदस्याः, समाजः, कक्ष्याः, ध्वनिमुद्रणयन्त्रम्, दूरदर्शनम् इत्यादीनि।
* **भाषणकौशलम्-** भावाभिव्यक्तये ध्वन्यात्मकं भाषायाः इदं द्वितीयं कौशलम्। वाग्-रूपं भावप्रकटनम् एव भाषणम्, परिसरप्रभावेण आधारेण वा भाषणशक्तिः जायते।
* **पठनकौशलम्** – भावाधिग्रहणाय लिप्यात्मकं भाषायाः तृतीयं कौशलम् इदम्। (अर्थग्रहणपूर्वकं स्पष्टरूप-वाचनम् इत्यर्थः)
* **लेखनकौशलम्-** भावाभिव्यक्तये लिप्यात्मकं भाषायाः चतुर्थं कौशलम् इदम्। (ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणं लेखनम् इति उच्यते)
* ज्ञानात्मक-अवबोधनात्मक-अनुप्रयोगात्मक-विश्लेषणात्मक-संश्लेषणात्मक-मूल्याङ्कनात्मक-लक्षिताधिगमनविशेषाः।

# संस्कृतम् (ऐच्छिकम्)
## विषय-कोड्-सङ्ख्या - 022
## कक्षा - एकादशी (2025-26)

आहत्य-अङ्काः - 80+20

वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागचतुष्टयं भविष्यति –

| | | |
|---|---|---|
| 'क' भागः | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः | रचनात्मककार्यम् | 10 अङ्काः |
| 'ग' भागः | अनुप्रयुक्तव्याकरणम् | 20 अङ्काः |
| 'घ' भागः | | |
| | (i) पठितावबोधनम् | 30 अङ्काः |
| | (ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः | 10 अङ्काः |

**भागानुसारं विषयाः अङ्कविभाजनञ्च 80 अङ्काः**

| क्र. सं. | विषयाः | प्रश्नप्रकाराः | मूल्यभारः |
|---|---|---|---|
| | **'क' भागः अपठितावबोधनम्** | | **10 अङ्काः** |
| 1. | एकः गद्यांशः (100-120 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम् (लघूत्तरात्मकः)<br>भाषिककार्यम् (बहुविकल्पात्मकाः) | 2×1=2<br>2×2=4<br>1×1=1<br>3×1=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | **'ख' भागः रचनात्मककार्यम्** | | **10 अङ्काः** |
| 2. | पत्रलेखनम् | निबन्धात्मकः | 5 |
| 3. | अनुच्छेदलेखनम्<br>अथवा<br>संस्कृतभाषया अनुवादः | निबन्धात्मकः | 5 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | **'ग' भागः अनुप्रयुक्तव्याकरणम्** | | **20 अङ्काः** |
| 4. | सन्धिः | लघूत्तरात्मकाः | 3×1=3 |
| 5. | शब्दरूपाणि | बहुविकल्पात्मकाः | 3×1=3 |

| | | | |
|---|---|---|---|
| 6. | धातुरूपाणि | बहुविकल्पात्मकाः | 3×1=3 |
| 7. | प्रत्ययाः | बहुविकल्पात्मकाः | 3×1=3 |
| 8. | अव्ययानि | लघूत्तरात्मकाः | 4×½=2 |
| 9. | कारकोपपदविभक्तयः | बहुविकल्पात्मकाः | 3×1=3 |
| 10. | पठितपाठ्यांशेषु सरलसमस्तपदानां विग्रहाः | बहुविकल्पात्मकाः | 3×1=3 |
| | | **पूर्णभारः** | **20 अङ्काः** |
| **'घ' भागः (i) पठितावबोधनम्** | | | **30 अङ्काः** |
| 11. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 12. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 13. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 14. | प्रश्ननिर्माणम् | पूर्णवाक्यात्मकाः | 4×1=4 |
| 15. | अन्वयः | निबन्धात्मकः | 3 |
| 16. | भावार्थलेखनम्/ चरित्रचित्रणम् | निबन्धात्मकः | 3 |
| 17. | सप्रसङ्गव्याख्या | निबन्धात्मकः | 5 |
| | | **पूर्णभारः** | **30 अङ्काः** |
| **'घ' भागः (ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः** | | | **10 अङ्काः** |
| 18. | प्रमुखलेखकानां परिचयः | अति-लघूत्तरात्मकाः | 4×1=4 |
| 19. | संस्कृतभाषोद्भवविकासौ वैदिक-साहित्यस्य परिचयश्च | लघूत्तरात्मकाः | 3×1=3 |
| 20. | लौकिक-साहित्यस्य परिचयः | लघूत्तरात्मकाः | 3×1=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | | **सम्पूर्णभारः** | **80 अङ्काः** |

# प्रश्नपत्र-प्रारूपम् /संरचना

## संस्कृतम् (ऐच्छिकम्)

## विषय-कोड्-सङ्ख्या - 022

## कक्षा - एकादशी (2025-26)

| प्रश्नप्रकारः | प्रश्नानां सङ्ख्या | विभाग-सङ्ख्या | प्रतिप्रश्नम् अङ्कभारः | आहत्याङ्काः |
|---|---|---|---|---|
| बहुविकल्पात्मकाः 1 अङ्कः | 3+3+3+3+3+3=18 | 6 | 1 | 18 |
| अति-लघूत्तरात्मकाः ½ अङ्कः | 2+2+2=6 | 3 | ½ | 3 |
| अति-लघूत्तरात्मकाः 1 अङ्कः | 2+4=6 | 2 | 1 | 6 |
| निबन्धात्मकाः 5 अङ्काः | 1+1+1 =3 | 3 | 5 | 15 |
| निबन्धात्मकाः 3 अङ्काः | 1+1=2 | 2 | 3 | 6 |
| दीर्घोत्तरात्मकाः 1 अङ्कः | 2+2+2+4=10 | 4 | 1 | 10 |
| दीर्घोत्तरात्मकाः 2 अङ्कौ | 2=2 | 1 | 2 | 4 |
| लघूत्तरात्मकाः ½ अङ्कः | 4=4 | 1 | ½ | 2 |
| लघूत्तरात्मकाः 1 अङ्कः | 1+3+2+2+2+3+3=16 | 7 | 1 | 16 |
| | | | आहत्याङ्काः | 80 |

# संस्कृतम् (ऐच्छिकम्)
## विषय-कोड्-सङ्ख्या - 022
## कक्षा - एकादशी (2025-26)
## वार्षिकमूल्याङ्कनम्

| 'क' भागः<br>अपठितावबोधनम् (10 अङ्काः) | |
|---|---|
| 1. एकः अपठितः गद्यांशः<br>100-120 शब्दपरिमितः गद्यांशः, सरलकथा<br>➢ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (2+4)<br>➢ शीर्षकलेखनम् (1)<br>➢ अनुच्छेद-आधारितं भाषिकं कार्यम् (3)<br>भाषिककार्याय तत्त्वानि -<br>✓ वाक्ये कर्तृ-क्रियापदचयनम्<br>✓ विशेषण-विशेष्यचयनम्<br>✓ पर्याय-विलोमपदचयनम्<br>✓ सवर्नामस्थाने संज्ञाप्रयोगः | 10 |
| **'ख' भागः<br>रचनात्मककार्यम् (10 अङ्काः)** | |
| 2. सङ्केताधारितम् औपचारिकम् अथवा अनौपचारिकं पत्रलेखनम् (पूर्णं पत्रं लेखनीयम्) | 5 |
| 3. सङ्केताधारितम् अनुच्छेदलेखनम्<br>अथवा<br>हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां वाक्यानां संस्कृतभाषया अनुवादः | 5 |
| **'ग' भागः<br>अनुप्रयुक्तव्याकरणम् (20 अङ्काः)** | |
| 4. सन्धिकार्यम्<br>➢ स्वरसन्धिः<br>दीर्घः, गुणः, यण्, अयादि, पूर्वरूपम्<br>➢ व्यञ्जनसन्धिः<br>श्चुत्वम्, ष्टुत्वम्, मोऽनुस्वारः, परसवर्णः<br>➢ विसर्गसन्धिः<br>सत्वम्, उत्वम्, रुत्वम्, लोपः | 3 |
| 5. शब्दरूपाणि (वाक्येषु विभक्ति-प्रयोगः)<br>➢ अजन्ताः - सर्व, पूर्व, सखि, दातृ, नृ, गो, स्वसृ, अक्षि<br>➢ हलन्ताः – भवत्, पथिन्, मरुत्, तादृश्, अदस्, दिश्, वाच्, गिर्, धनिन्, पयस् | 3 |

| | |
|---|---|
| 6. धातुरूपाणि<br>➢ परस्मैपदिनः (2 अङ्कौ)<br>भू, गम्, नम्, अस्, क्रुध्, हन्, श्रु, नश्, आप्, शक्, इष्, प्रच्छ्, कृ, ज्ञा, भक्ष्, चिन्त्, नृत्, कथ् (पञ्चलकारेषु)<br>➢ आत्मनेपदिनः (1 अङ्कः)<br>सेव्, रुच्, लभ्, मुद्, याच् - (लट्-लृट्लकारयोः) | 3 |
| 7. प्रत्ययाः<br>(अ) कृदन्ताः – क्त, क्तवतु, शतृ, शानच्, यत्, तव्यत्, अनीयर्, तृच्, क्तिन्, अच्।<br>(आ) तद्धिताः – णिनि, ठक्, अण्, त्व, मयट् ।<br>(इ) स्त्रीप्रत्ययौ – टाप्, ङीप्। | 3 |
| 8. अव्ययानि<br>उच्चैः, शनैः, अधः, ऋते, युगपत्, अद्य, श्वः, ह्यः, सायम्, चिरम्, तूष्णीम्, सहसा, मिथ्या, पुरा, प्रायः, नूनम्, भूयः, खलु । पठितांशेषु प्रयुक्तानि अन्यानि अव्ययपदानि च | 2 |
| 9. विभक्तिप्रयोगाः – पठितपाठ्यांशेषु प्रयुक्त-उपपदकारकविभक्तीः अधिकृत्य प्रश्नाः | 3 |
| 10. पठितपाठ्यांशेषु सरलसमस्तपदानां विग्रहाः | 3 |
| **'घ' भागः**<br>**(i) पठितावबोधनम्** | **(30 अङ्काः)** |
| 11. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपदचयनम्<br>➢ सवर्नामस्थाने संज्ञाप्रयोगः | 5 |
| 12. पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपदचयनम्<br>➢ सवर्नामस्थाने संज्ञाप्रयोगः | 5 |
| 13. नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपदचयनम् | 5 |

| | |
|---|---|
| ➢ सवर्नामस्थाने संज्ञाप्रयोगः<br>14. वाक्येषु रेखाङ्कितपदानि अधिकृत्य उचितप्रश्ननिर्माणम्<br>15. एकस्य श्लोकस्य अन्वयः (पूर्णः अन्वयः लेखनीयः)<br>16. भावार्थलेखनम्/ चरित्रचित्रणम्<br>17. सप्रसङ्गव्याख्या | <br>4<br>3<br>3<br>5 |
| **‘घ’ भागः**<br>**(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः** | **(10 अङ्काः)** |
| 18. पाठ्यपुस्तके सङ्कलित-अंशानां प्रमुखलेखकानां परिचयः<br>19. वैदिक-साहित्यस्य परिचयः<br>20. लौकिक-साहित्यस्य परिचयः | 4<br>3<br>3 |

## परीक्षायै निर्धारिताः पाठाः

| पाठ्यपुस्तकम् – शाश्वती - प्रथमो भागः | | | |
|---|---|---|---|
| **पाठसङ्ख्या** | **पाठनाम** | **पाठसङ्ख्या** | **पाठनाम** |
| प्रथमः पाठः | वेदामृतम् | नवमः पाठः | विज्ञाननौका |
| तृतीयः पाठः | परोपकाराय सतां विभूतयः | दशमः पाठः | कन्यामाणिक्यम् |
| चतुर्थः पाठः | मानो हि महतां धनम् | एकादशः पाठः | ईशः कुत्रास्ति |
| पञ्चमः पाठः | सौवर्णशकटिका | त्रयोदशः पाठः | सत्त्वमाहो रजस्तमः |
| षष्ठः पाठः | आहारविचारः | | |

| पाठ्यपुस्तकम् – संस्कृत-साहित्य-परिचय | |
|---|---|
| **पाठसङ्ख्या** | **पाठनाम** |
| प्रथम अध्याय | संस्कृत भाषा उद्भव एवं विकास वैदिक साहित्य |
| तृतीय अध्याय | रामायण, महाभारत एवं पुराण |

**सहायकपुस्तकानि**

- व्याकरणसौरभम् (संशोधितसंस्करणम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम् ।
- हायर संस्कृतग्रामर (एम् आर् कालेलिखितम् )
- रचनानुवादकौमुदी - कपिलदेवद्विवेदीलिखितम् विश्वविद्यालयप्रकाशनम्, वाराणसी ।
- वेदपारिजात (अतिरिक्ताध्ययनार्थम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम् ।

*********************

# संस्कृतम् (ऐच्छिकम्)
## विषय-कोड्-सङ्ख्या - 022
## कक्षा - द्वादशी (2025-26)

आहत्य-अङ्काः - 80+20

वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागपञ्चकं भविष्यति –

| | | | |
|---|---|---|---|
| 'क' भागः | अपठितावबोधनम् | | 10 अङ्काः |
| 'ख' भागः | रचनात्मककार्यम् | | 10 अङ्काः |
| 'ग' भागः | अनुप्रयुक्तव्याकरणम् | | 15 अङ्काः |
| 'घ' भागः | | | 35 अङ्काः |
| | (i) पठितावबोधनम् | (25 अङ्काः) | |
| | (ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः | (10 अङ्काः) | |
| 'ङ' भागः छन्दोऽलङ्कार-परिचयः | | | 10 अङ्काः |

### भागानुसारं विषयाः अङ्कविभाजनञ्च 80 अङ्काः

| क्र. सं. | विषयाः | प्रश्नप्रकाराः | मूल्यभारः |
|---|---|---|---|
| | **'क' भागः अपठितावबोधनम्** | | **10 अङ्काः** |
| 1. | एकः गद्यांशः (100-120 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम् (लघूत्तरात्मकः)<br>भाषिककार्यम् (बहुविकल्पात्मकाः) | 2×1=2<br>2×2=4<br>1×1=1<br>3×1=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | **'ख' भागः रचनात्मककार्यम्** | | **10 अङ्काः** |
| 2. | पत्रलेखनम् | निबन्धात्मकः | 5 |
| 3. | अनुच्छेदलेखनम्<br>अथवा<br>संस्कृतभाषया अनुवादः | निबन्धात्मकः | 5 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | **'ग' भागः अनुप्रयुक्तव्याकरणम्** | | **15 अङ्काः** |
| 4. | सन्धिः | लघूत्तरात्मकाः | 3×1=3 |

| | | | |
|---|---|---|---|
| 5. | प्रत्ययाः | बहुविकल्पात्मकाः | 3×1=3 |
| 6. | अव्ययानि | लघूत्तरात्मकाः | 3×1=3 |
| 7. | कारक-उपपदविभक्तयः | लघूत्तरात्मकाः | 3×1=3 |
| 8. | पठितपाठ्यांशेषु सरलसमस्तपदानां विग्रहाः | बहुविकल्पात्मकाः | 3×1=3 |
| | | **पूर्णभारः** | 15 **अङ्काः** |
| | **'घ' भागः**<br>**(i) पठितावबोधनम्** | | **25 अङ्काः** |
| 9. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 10. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 11. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>लघूत्तरात्मकौ (भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 12. | प्रश्ननिर्माणम् | पूर्णवाक्यात्मकाः | 4×1=4 |
| 13. | अन्वयः | निबन्धात्मकः | 3 |
| 14. | भावार्थलेखनम्/ चरित्रचित्रणम् | निबन्धात्मकः | 3 |
| | | **पूर्णभारः** | **25 अङ्काः** |
| | **'घ' भागः**<br>**(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः** | | **10 अङ्काः** |
| 15. | महाकाव्य-ऐतिहासिक-काव्यम् | बहुविकल्पात्मकाः | 3×1=3 |
| 16. | गद्यकाव्यम् चम्पूकाव्यम् च | बहुविकल्पात्मकाः | 3×1=3 |
| 17. | नाट्यसाहित्यस्य परिचयः | बहुविकल्पात्मकाः | 4×1=4 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | **'ङ' भागः**<br>**छन्दोऽलङ्कारपरिचयः** | | **10 अङ्काः** |
| 18. | (अ) छन्दसां सोदाहरणम् सामान्यज्ञान-परीक्षणम्<br>(आ) श्लोकेषु छन्दसंज्ञानम् | लघूत्तरात्मकाः<br>लघूत्तरात्मकाः | 3×1=3<br>2×1=2 |
| 19. | (अ) अलङ्काराणाम् उदाहरणसहितलक्षणम्<br>(आ) श्लोकेषु अलङ्कारस्य अभिज्ञानपरीक्षणम् | लघूत्तरात्मकाः<br>लघूत्तरात्मकाः | 3×1=3<br>2×1=2 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | | **सम्पूर्णभारः** | **80 अङ्काः** |

## प्रश्नपत्र-प्रारूपम् /संरचना

## संस्कृतम् (ऐच्छिकम्)

### विषय-कोड्-सङ्ख्या - 022

### कक्षा - द्वादशी (2025-26)

| प्रश्नप्रकारः | प्रश्नानां सङ्ख्या | विभाग-सङ्ख्या | प्रतिप्रश्नम् अङ्कभारः | आहत्याङ्काः |
|---|---|---|---|---|
| बहुविकल्पात्मकाः 1 अङ्कः | 3+3+3+3+3+4=19 | 6 | 1 | 19 |
| अति-लघूत्तरात्मकाः ½ अङ्कः | 2+2+2=6 | 3 | ½ | 3 |
| अति-लघूत्तरात्मकाः 1 अङ्कः | 2=2 | 1 | 1 | 2 |
| निबन्धात्मकाः 5 अङ्काः | 1+1 =2 | 2 | 5 | 10 |
| निबन्धात्मकाः 3 अङ्काः | 1+1=2 | 2 | 3 | 6 |
| दीर्घोत्तरात्मकाः 1 अङ्कः | 2+2+2+4=10 | 4 | 1 | 10 |
| दीर्घोत्तरात्मकाः 2 अङ्कौ | 2=2 | 1 | 2 | 4 |
| लघूत्तरात्मकाः 1 अङ्कः | 1+3+3+3+2+2+2+3+2+3+2=26 | 11 | 1 | 26 |
| | | | आहत्याङ्काः | 80 |

# संस्कृतम् (ऐच्छिकम्)
## विषय-कोड्-सङ्ख्या - 022
## कक्षा - द्वादशी (2025-26)
## वार्षिकमूल्याङ्कनम्

| | |
|---|---|
| **'क' भागः**<br>**अपठितावबोधनम्** | **(10 अङ्काः)** |
| 1. एकः अपठितः गद्यांशः<br>100-120 शब्दपरिमितः गद्यांशः, सरलकथा<br>➢ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (2+4)<br>➢ शीर्षकलेखनम् (1)<br>➢ अनुच्छेद-आधारितं भाषिकं कार्यम् (3)<br>भाषिककार्याय तत्त्वानि -<br>✓ वाक्ये कर्तृ-क्रियापदचयनम्<br>✓ विशेषण-विशेष्यचयनम्<br>✓ पर्याय-विलोमपदचयनम्<br>✓ सर्वनामस्थाने संज्ञाप्रयोगः | 10 |
| **'ख' भागः**<br>**रचनात्मककार्यम्** | **(10 अङ्काः)** |
| 2. सङ्केताधारितम् औपचारिकम् अथवा अनौपचारिकं पत्रलेखनम् (पूर्णं पत्रं लेखनीयम्) | 5 |
| 3. सङ्केताधारितम् अनुच्छेदलेखनम्<br>अथवा<br>हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां वाक्यानां संस्कृतभाषया अनुवादः | 5 |
| **'ग' भागः**<br>**अनुप्रयुक्तव्याकरणम्** | **(15 अङ्काः)** |
| 4. सन्धिकार्यम्<br>➢ स्वरसन्धिः<br>दीर्घः, गुणः, यण्, अयादि, पूर्वरूपम्<br>➢ व्यञ्जनसन्धिः<br>श्चुत्वम्, ष्टुत्वम्, मोऽनुस्वारः,परसवर्णः<br>➢ विसर्गसन्धिः<br>सत्वम्, उत्वम्, रुत्वम्, लोपः | 3 |
| 5. प्रत्ययाः<br>➢ कृदन्ताः – क्त, क्तवतु, शतृ, शानच्, यत्, तव्यत्, अनीयर्, तृच्, क्तिन्, अच्।<br>➢ तद्धिताः – णिनि, ठक्, अण्, त्व, मयट् । | 3 |

| | |
|---|---|
| ➢ स्त्रीप्रत्ययाः – टाप्, ङीप्।<br>6. अव्ययानि<br>उच्चैः, शनैः, अधः, ऋते, युगपत्, अद्य, श्वः, ह्यः, सायम्, चिरम्, तूष्णीम्, सहसा, मिथ्या, पुरा, प्रायः, नूनम्, भूयः, खलु । पठितांशेषु प्रयुक्तानि अन्यानि अव्ययपदानि च<br>7. विभक्तिप्रयोगाः – पठितपाठ्यांशेषु प्रयुक्त-उपपदकारकविभक्तीः अधिकृत्य प्रश्नाः<br>8. पठितपाठ्यांशेषु सरलसमस्तपदानां विग्रहाः | 3<br><br>3<br>3 |
| **'घ' भागः**<br>**(i) पठितावबोधनम्** | **(25 अङ्काः)** |
| 9. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपदचयनम्<br>➢ सवर्नामस्थाने संज्ञाप्रयोगः<br>10. पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपदचयनम्<br>➢ सवर्नामस्थाने संज्ञाप्रयोगः<br>11. नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ-क्रियापदचयनम्<br>➢ विशेषण-विशेष्यचयनम्<br>➢ पर्याय-विलोमपदचयनम्<br>➢ सवर्नामस्थाने संज्ञाप्रयोगः<br>12. वाक्येषु रेखाङ्कितपदानि अधिकृत्य उचितप्रश्ननिर्माणम्<br>13. एकस्य श्लोकस्य अन्वयः (पूर्णः अन्वयः लेखनीयः)<br>14. भावार्थलेखनम् / चरित्रचित्रणम् | 5<br><br>5<br><br>5<br><br>4<br>3<br>3 |

| 'घ' भागः<br>(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः | (10 अङ्काः) |
|---|---|
| 15. महाकाव्य-ऐतिहासिक-काव्यम्<br>16. गद्यकाव्यम् चम्पूकाव्यम् च<br>17. नाट्यसाहित्यस्य परिचयः | 3<br>3<br>4 |
| 'ङ' भागः<br>छन्दोऽलङ्कारपरिचयः | (10 अङ्काः) |
| 18. (क) छन्दसां सोदाहरणम् सामान्यज्ञान-परीक्षणम्<br>छन्दांसि<br>➢ अनुष्टुप्, उपजाति, वसन्ततिलका, मालिनी, शिखरिणी, मन्दाक्रान्ता।<br>(ख) श्लोकेषु छन्दसंज्ञानम् (प्रदत्तश्लोकेषु छन्दसः अभिज्ञानम्) | 3<br><br><br>2 |
| 19. (क) अलङ्काराणाम् उदाहरणसहितलक्षणम्<br>शब्दालङ्काराः – अनुप्रासः, यमकः, श्लेषः,<br>अर्थालङ्काराः – उपमा, रूपकम्, उत्प्रेक्षा<br>(ख) श्लोकेषु अलङ्कारस्य अभिज्ञानपरीक्षणम् (प्रदत्तश्लोकेषु अलङ्कारस्य अभिज्ञानम्) | 3<br><br><br>2 |

## परीक्षायै निर्धारिताः पाठाः

| पाठ्यपुस्तकम् – शाश्वती - द्वितीयो भागः | | | |
|---|---|---|---|
| पाठसङ्ख्या | पाठनाम | पाठसङ्ख्या | पाठनाम |
| प्रथमः पाठः | विद्ययाऽमृतमश्नुते | सप्तमः पाठः | विक्रमस्यौदार्यम् |
| द्वितीयः पाठः | रघुकौत्ससंवादः | अष्टमः पाठः | कार्यं वा साधयेयम्, देहं वा पातयेयम् |
| तृतीयः पाठः | बालकौतुकम् | नवमः पाठः | दीनबन्धुः श्रीनायरः |
| चतुर्थः पाठः | कर्मगौरवम् | दशमः पाठः | योगस्य वैशिष्ट्यम् |
| पञ्चमः पाठः | शुकनासोपदेशः | | |

| पाठ्यपुस्तकम् – संस्कृत-साहित्य-परिचय | | | |
|---|---|---|---|
| पाठसङ्ख्या | पाठनाम | पाठसङ्ख्या | पाठनाम |
| चतुर्थ अध्याय | महाकाव्य | सप्तम अध्याय | गद्य काव्य एवं चम्पू काव्य |
| पञ्चम अध्याय | ऐतिहासिक महाकाव्य | नवम अध्याय | नाट्य साहित्य |

**सहायकपुस्तकानि**

व्याकरणसौरभम् (संशोधितसंस्करणम्) रा. शै. अनु. प्र. परि. द्वारा प्रकाशितम् ।(सहायकपुस्तकम्)

हायर संस्कृत ग्रामर (एम् आर् कालेलिखितम् )

रचनानुवादकौमुदी (सहायकपुस्तकम्) कपिलदेवद्विवेदिलिखितम् विश्वविद्यालयप्रकाशनम्, वाराणसी ।

# आन्तरिक-मूल्याङ्कनम्

## (20 अङ्काः)

**उद्देश्यानि**

- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण-भाषण-पठन-लेखनकौशलानां विकासः।
- ❖ चिन्तनक्षमतायाः आत्मविश्वासस्य च संवर्धनम्।

| क्र. सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1. | **आवधिक-परीक्षाः (पीरियोडिक् - असैस्मैंट)** | लिखितपरीक्षा | 05 | विद्यालयेन समये समये लिखितपरीक्षाणाम् आयोजनं करणीयं भवति। | परीक्षासु यत्र विद्यार्थिनः श्रेष्ठाः अङ्काः स्युः तयोः द्वयोः परीक्षयोः एव अधिभारः ग्रहीतव्यः। अपि च आवधिकपरीक्षासु अपि प्रश्नेषु आन्तरिकविकल्पाः देयाः। मूल्याङ्कनसमये यदि छात्रः सर्वान् प्रश्नान् उत्तरति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः सन्ति तेषाम् एव मूल्याङ्कनं करणीयम्। |
| 2 | **बहुविधमूल्याङ्कनम्** | ❖ कक्षायां पाठितस्य पाठस्य लघुमूल्याङ्कनम्<br>❖ निर्गतपत्राणि<br>❖ प्रश्नोत्तरी<br>❖ मौखिकी परीक्षा<br>❖ प्रतियोगिताः<br>❖ प्रश्नमञ्चस्यायोजनम् | 05 | कक्षायां पाठित-पाठस्य विषयस्य वा बहुविधं मूल्याङ्कनम् अपेक्षितम् अस्ति। अनेन विद्यार्थिनां विविधकौशलानां मूल्याङ्कनं भवेत्। | ❖मौलिकता<br>❖विषयसम्बद्धता<br>❖शुद्धता<br>❖समयबद्धता<br>❖प्रस्तुतीकरणम् |
| 3. | **निवेशसूचिका (पोर्टफोलियो)** | ❖ कक्षाकार्यम्<br>❖ सामूहिक-मूल्याङ्कनम्<br>❖ स्वमूल्याङ्कनम्<br>❖ विद्यार्थिनः विषयगताः उपलब्धयः | 05 | विद्यार्थिभिः कक्षायां कृतानां कार्याणाम् उपलब्धीनां च संरक्षणं संयोजनं च सञ्चिकायां पत्रावल्यां वा करणीयम्। एतेन समग्रं मूल्याङ्कनं प्रामाणिकत्वेन भवितुं शक्नोति। | ❖ सुलेखः<br>❖ तथ्यात्मकता<br>❖ प्रामाणिकता<br>❖ समयबद्धता |

| | | | | | |
|---|---|---|---|---|---|
| 4. | **भाषा-संवर्धनाय गतिविधयः**<br>**(क) श्रवण-भाषण-कौशलम्** | ❖ कथा<br>❖ संवादः/ वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ताः<br>❖ आशुभाषणम्<br>❖ संस्कृतगीतानि<br>❖ श्लोकोच्चारणम्<br>❖ प्रहेलिकाः | 05 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम्<br>(आरोहावरोह-गतियति-प्रयोगः) |
| | **(ख) लेखनकौशलम्** | ❖ विविधविषयान् आधृत्य मौलिकलेखनम् यथा– देशः, माता, पिता, गुरुः, विद्या पर्यावरणम्, योगः, समयस्य सदुपयोगः, शिक्षा, अनुशासनम् इत्यादयः।<br>❖ शैक्षिकभ्रमणस्य संस्कृतेन प्रतिवेदनलेखनम्।<br>❖ दैनन्दिनीलेखनम्।<br>❖ सङ्केताधारितं कथालेखनम्।<br>❖ भित्तिपत्रिकायाः निर्माणम्।<br>❖ श्रुतलेखः।<br>❖ सूक्तिलेखनम्। | | ❖ छात्राः यथाशक्यं कक्षायामेव लेखनकार्यं कुर्युः।<br>❖ टिप्पणी- पुस्तिकायाः निर्माणम्।<br>❖ वैयक्तिकपरीक्षणम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्यप्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |
| | **अवधातव्यम्** –उपर्युक्त-गतिविधयः उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यगतिविधयः अपि भवितुमर्हन्ति। | | | | |

***************************************